इदानीं मम गुरुः तत्र अस्ति। देवः सर्वत्र अस्ति। विष्णुः सर्वत्र अस्ति। पर्वते सिंहः अस्ति। आकाशे मेघः अस्ति। आकाशे सूर्यः अस्ति। वने वृक्षः अस्ति। वृक्षे खगः अस्ति। बालकः उपरि अस्ति। मम मित्रस्य निवासः नगरे अस्ति। अत्र पुरुषः अस्ति परन्तु स्त्री नास्ति।

**तद्** अस्ति। तदस्ति। तद् नास्ति। तद् किम् अस्ति? तद् किमस्ति? तद् मम पुस्तकमस्ति। तद् मनुष्यस्य बलं नास्ति। तद् ईशस्य बलमस्ति। तद् मोदकमस्ति। तद् फलं नास्ति। तत्र जलमस्ति। तत्र शुद्धं जलमस्ति। किमत्र दुग्धमस्ति? अत्र स्वादु दुग्धमस्ति। किं तत्र स्वादु दुग्धं नास्ति? तत्र कन्यागुरुकुलमस्ति। तव चित्तं कुत्र अस्ति? भो मित्र तव गृहं कुत्र अस्ति? तस्य गृहं अत्र अस्ति? **कस्मिन्** पुस्तके तद् आलेख्यमस्ति?

तस्य गृहं तत्र अस्ति। तस्य गृहमतीव दूरमस्ति। मम गृहमत्र नास्ति। नगरे मम गृहमस्ति। मम गृहं नगरे अस्ति। तस्य गृहे अश्वः अस्ति। मम गृहे अश्वः नास्ति। पुस्तके ज्ञानमस्ति। देवे सर्वमस्ति। मम भोजने ओदनमस्ति व्यञ्जनमपि अस्ति। रामायणे रामचन्द्रस्य चरितमस्ति। तत्र कूपस्य जलं स्वादु नास्ति। तत्र वायुः नास्ति जलमपि नैव अस्ति। अत्र जलमपि नास्ति। हसनं वरं अस्ति। एवं हसनं वरं नैव अस्ति। गृहं पुराणमस्ति। तस्य गृहमतीव पुराणमस्ति। जीवनं व्यर्थं नास्ति। जलं मलिनमस्ति। जलमतीव मलिनमस्ति। तस्य तडागस्य जलमतीव मलिनमस्ति। वस्त्रं मलिनमस्ति। तव वस्त्रं मलिनमस्ति। मुखं मलिनमस्ति। बालकस्य मुखं मलिनमस्ति। वस्त्रं रक्तमस्ति। बालकस्य वस्त्रं रक्तमस्ति। शिखरं रमणीयमस्ति। पर्वतस्य शिखरं रमणीयमस्ति। फलं पक्वमस्ति। वृक्षे वृक्षे फलं पक्वमस्ति। फलं मधुरमस्ति। तस्य फलमतीव मधुरमस्ति। मार्गे दुःखमस्ति। एकस्मिन् मार्गे दुःखमस्ति। अन्यस्मिन् मार्गे दुःखं नास्ति। भ्रमणं वरमस्ति। प्रातःकाले भ्रमणं वरमस्ति। सायंकालभ्रमणात् प्रातःकाले भ्रमणं वरमस्ति।

**एतद्** अस्ति। एतदस्ति। एतद् किम् अस्ति? एतद् किमस्ति? एतद् अन्नम् अस्ति। एतदन्नमस्ति। एतद् अन्नम् उष्णम् अस्ति। एतदन्नमुष्णमस्ति। एतदन्नमतीव उष्णमस्ति। कस्य एतद् पुस्तकमस्ति? एतद् तस्य पुस्तकमस्ति। एतद् कस्य गृहमस्ति? एतद् मम मित्रस्य गृहमस्ति। एतद् कस्य आलेख्यमस्ति? देवस्य एतद् सर्वमस्ति। तस्य एतद् पुस्तकमस्ति। किम्

एतद् वरम् अस्ति? किमेतद्वरमस्ति? पुस्तकस्य किं मूल्यमस्ति? अखिलस्य संसारस्य किं मूलमस्ति?

**सा** अस्ति। सा नास्ति। सा **का** अस्ति? सा दया अस्ति। सा ईश्वरस्य दया अस्ति। सा रम्या नगरी अस्ति। तस्य शाला उत्तमा अस्ति। कस्मिन् स्थाने तस्य पाठशाला अस्ति? तव पत्नी अत्र अस्ति किम्? तव पुत्रिका कुत्र अस्ति? अन्यस्मिन् पुस्तके सा कथा नास्ति। **एषा** अस्ति। एषा का अस्ति?

धनं किमर्थम् अस्ति? तत्र हवनार्थमिन्धनं नास्ति। वस्त्रस्य प्रक्षालनाय शुद्धं जलं तत्र अस्ति। जरायै किमौषधमस्ति? धनं दानाय एव अस्ति। तत्र स्नानाय जलमस्ति। तत्र स्नानाय जलं नास्ति परन्तु अत्र अस्ति। पठनाय पुस्तकमस्ति। शरीरस्य पोषणाय अन्नमस्ति। शरीरे आत्मा अस्ति। मरौ देशे जलं नास्ति। तस्य पितुः नाम शर्मा इति अस्ति। पुरात् बहिः वनमस्ति। रवौ प्रकाशः अस्ति। तव मातुः किं नाम अस्ति? अखिलायाः सृष्टेः किं मूलमस्ति?

**यथा** नृपः तथा विप्रः। यथा नृपः अस्ति तथा एव विप्रः अस्ति। एकस्मिन् मार्गे यथा दुःखमस्ति न तथा अन्यस्मिन् मार्गे। यत्र धूमः तत्र अग्निः अस्ति।

त्वम् **असि**। त्वमसि। त्वं कुत्र असि? त्वं कुशलः असि किम्? त्वमिदानीं कुशलः असि किम्? किं त्वं कुशलः असि इदानीम्? अहम् **अस्मि**। अहमस्मि। अहमत्र अस्मि। अहं कुशलः अस्मि। अहमिदानीं कुशलः अस्मि। यत्र सः अस्ति तत्र अहमस्मि। ते **सन्ति**। मासे दिवसाः सन्ति। आकाशे खगाः सन्ति। पाठे शब्दाः सन्ति। शब्दे अक्षराणि सन्ति।

सः **आसीत्**। रामः कः आसीत्? रामचन्द्रः दशरथस्य पुत्रः आसीत्। रामचन्द्रः अयोध्या-नामकस्य नगरस्य राजा आसीत्। रावणः कः आसीत्? रावणः लङ्का-नामधेयस्य नगरस्य राजा आसीत्। रामस्य भार्या का आसीत्? सीता-नामधेया रामस्य भार्या अतीव साध्वी आसीत्। रामचन्द्रस्य माता का आसीत्? कौशल्या-नामधेया श्रीरामचन्द्रस्य माता आसीत्। रावणस्य भ्राता कः आसीत्? विभीषणः रावणस्य भ्राता आसीत्। रामचन्द्रस्य लक्ष्मण-नामधेयः बन्धुः आसीत्।

सः **भवति**। सः प्रसन्नः भवति। सर्वदा सः प्रसन्नः भवति। रामस्य रावणेन सह युद्धं भवति। रावणस्य रामेण सह युद्धं भवति। द्रव्यस्य दानेन किं फलं भवति? द्रव्यस्य दानेन पुण्यं भवति। ईश्वरस्य कृपया सर्वं शुभं भवति। सूर्यात्प्रकाशः भवति। दीपात्प्रकाशः भवति। रवेः प्रकाशः भवति। ईश्वरात् ज्ञानं भवति। व्याघ्रात् भयं भवति। मेघात् वृष्टिः भवति। रात्रौ सूर्यः न भवति। समुद्रे अतीव जलं भवति। वने वने वृक्षः भवति। फले फले बीजं भवति। कूपे कूपे जलं भवति। राष्ट्रे राष्ट्रे राजा भवति। ग्रामे ग्रामे उद्यानं भवति। पुस्तके पुस्तके आलेख्यं भवति। जलं सुशुद्धं भवति। ताम्रस्य पात्रे जलमतीव सुशुद्धं भवति। वायुः शुद्धः भवति। तत्र प्रातः शुद्धः वायुः भवति। किं नगरे शुद्धः वायुः न भवति? नगरे शुद्धः वायुः कदापि न भवति। दुग्धं स्वादु भवति। वाणी मधुरा भवति। सः उत्तमः मनुष्यः भवति। सा अपि उत्तमा स्त्री भवति। तदा दशवादनसमयः भवति।

सः **भविष्यति**। तस्य वासः तत्र भविष्यति। भोजनाय अन्नं भविष्यति किम्? त्वं **भविष्यसि**। त्वं स्वस्थः भविष्यसि।

## २ गच्छति ...

सः **गच्छति**। सः न गच्छति। सः गच्छति किम्? नरः ग्रामं गच्छति किम्? किं सः गच्छति? किं सः मन्दिरं न गच्छति? किं सः मनुष्यः गच्छति? किं सः मनुष्यः प्रतिदिनं उद्यानं गच्छति? किं सः कन्यया सह उद्यानं गच्छति? कः तत्र गच्छति? कः तत्र दिवा गच्छति? कः मध्याह्ने पाठशालां गच्छति? गुरुः पाठशालां गच्छति। सः दूरं गच्छति। सः कुत्र गच्छति? सः उद्यानं गच्छति। देवः तत्र गच्छति। सः अन्यं नगरं गच्छति। सः नगरात् नगरं गच्छति। पतत्रिः आकाशे गच्छति। कथं सः पतत्रिः आकाशे गच्छति? यथा पतत्रिः आकाशे गच्छति तथा मनुष्यः तत्र गच्छति। मृगः वनात् वनं गच्छति। सः मार्गेण न गच्छति। तस्य भ्राता गृहं न गच्छति। सः कदा गच्छति? सः इदानीम्/अधुना गच्छति। अद्य सः मन्दिरं नैव गच्छति। रामः उद्याने सदा गच्छति। सः सायमुद्यानं न गच्छति। यदा सः पाठशालां न गच्छति तदा उद्यानमपि न गच्छति। मृगः मृगेण सह गच्छति। मनुष्यः मनुष्येण सह गच्छति। कन्यया सह सः मनुष्यः उद्यानं गच्छति। सः रथेन अन्यं ग्रामं शीघ्रं गच्छति। यथा त्वं गच्छसि तथा सः अपि गच्छति। सः किमर्थं सदा गच्छति? सः भ्रमणाय गच्छति। सः प्रतिदिनं सायंकाले पञ्चवादनसमये भ्रमणाय उद्यानं गच्छति। सः गच्छति **स्म**। रामः उद्याने सदा गच्छति स्म। सः **आगच्छति**। गुरुः अत्र आगच्छति। मया अभिवाद्यः गुरुः इदानीमत्र आगच्छति। कस्मात् ग्रामात् सः आगच्छति? सः नगरात् आगच्छति। सायं सायं जलमागच्छति।

त्वं **गच्छसि**। त्वं तं ग्रामं गच्छसि। त्वं गच्छसि किम्? त्वम् अद्य ग्रामं गच्छसि किम्? त्वमपि गच्छसि किम्? यथा त्वं गच्छसि तथा सः गच्छति। तदा तत्र त्वमपि गच्छसि किम्? यत्र त्वं गच्छसि तत्र सा न गच्छति किम्? किं त्वमद्य ग्रामं न गच्छसि? किं त्वं प्रतिदिनं सायंकाले भ्रमणाय गच्छसि? त्वं सदा किमर्थं नगरं गच्छसि? त्वं प्रातः वनं किमर्थं गच्छसि? त्वं तं ग्रामं किमर्थं न गच्छसि?

अहं **गच्छामि**। अहं रात्रौ नगरं न गच्छामि। अहं सायं नगरात् बहिः गच्छामि। अहं रात्रौ ग्रामात् बहिः न गच्छामि। अहं भ्रात्रा सह ग्रामं गच्छामि। अहमपि तस्मिनेव समये उद्यानं गच्छामि। प्रातः स्नानाय गच्छामि। अहं प्रातः भ्रमणाय गच्छामि न सायम्। अहं दिने दिने सायंकाले प्रातःकाले वा भ्रमणाय गच्छामि। यत्र त्वं गच्छसि तत्र अहं गच्छामि। यत्र यत्र अहं गच्छामि तत्र तत्र सः नित्यं गच्छति।

सः **गमिष्यति**। सः श्रमणाय सायं गमिष्यति किम्? किं सः रथेन ग्रामं न गमिष्यति? सः तत्र प्रातः गमिष्यति न वा? धेनुः वनं गमिष्यति। सः अपि गमिष्यति। सोऽपि गमिष्यति। यदि तव पिता गमिष्यति तर्हि सोऽपि गमिष्यति। नोचेद् नैव गमिष्यति। सः नगरं नैव गमिष्यति। सः कदा तत्र गमिष्यति? कदा सः पुनः स्वनगरं गमिष्यति? सः कदा उद्यानं गमिष्यति? तव पुत्रः कदा वनं गमिष्यति? तव भ्राता नगरं कदा गमिष्यति? सः श्वः तत्र गमिष्यति। सः तत्र श्वः गमिष्यति। सः नगरं श्वः गमिष्यति। सः इदानीं नैव गमिष्यति। नृपतिः अद्य भ्रमणाय गमिष्यति। सः अद्य एव ग्रामं गमिष्यति। मम माता अद्य सायं वनं गमिष्यति। सः अध्यापकः शीघ्रं गमिष्यति।

सः **आगमिष्यति**। सः कदा आगमिष्यति? कदा सः आगमिष्यति? सः कदा अत्र आगमिष्यति? आचार्यः कदा आगमिष्यति? सः पुनः कदा गृहमागमिष्यति? सः अत्र श्वः प्रातः आगमिष्यति। सः सायमत्र आगमिष्यति। सः श्वः प्रभाते आगमिष्यति। सः प्रायः सायंकालमागमिष्यति।

इदानीमत्र सः आगमिष्यति। आचार्यः सत्वरमागमिष्यति। तस्य भ्राता शीघ्रं न आगमिष्यति। मम मित्रः इदानीमत्र आगमिष्यति। यदि त्वं गमिष्यसि सः न आगमिष्यति। कदा सा पुनः स्वगृहमागमिष्यति ? यदा तस्याः माता आगमिष्यति तदा एव तया सह सा अपि आगमिष्यति।

त्वं **गमिष्यसि**। त्वं तत्र गमिष्यसि किम् ? त्वं श्वः नगरं न गमिष्यसि किम् ? त्वं श्वः कुत्र गमिष्यसि ? यत्र यत्र त्वं गमिष्यसि तत्र तत्र सः गमिष्यति। त्वं तं ग्रामं कदा गमिष्यसि ? केन सह त्वं वनं गमिष्यसि ? त्वम् **आगमिष्यसि**। त्वं कदा आगमिष्यसि ? यदा सः गमिष्यति तदा त्वं न आगमिष्यसि किम् ?

अहं **गमिष्यामि**। त्वं परश्वः ग्रामं गमिष्यसि किम् ? अहं नैव गमिष्यामि। अहं तत्र परश्वः गमिष्यामि। अहं स्वग्राममद्य गमिष्यामि। अहमद्य रात्रौ वनं गमिष्यामि। न अहमद्य सायं नगरं गमिष्यामि। नहि अहं श्वः मध्याह्ने तत्र गमिष्यामि। सायं भ्रमणाय अहं गमिष्यामि। यत्र सः श्वः गमिष्यति तत्र अहं परश्वः गमिष्यामि। तदा एव अहं गमिष्यामि। यदा त्वं तत्र गमिष्यसि अहं मध्याह्ने तत्र गमिष्यामि। यदि त्वं गमिष्यसि तदा अहं गमिष्यामि। यदि त्वं न गमिष्यसि तर्हि अहं न गमिष्यामि। यदि सः उद्यानं न गमिष्यति तर्हि अहमपि न गमिष्यामि। यदि त्वं नगरं श्वः गमिष्यसि तर्हि अहं परश्वः गमिष्यामि। अहम् **आगमिष्यामि**। अहं प्रातः गमिष्यामि सायं च आगमिष्यामि। यदा त्वं वनं गमिष्यसि तदा अहमपि आगमिष्यामि।

सः **धावति**। अश्वः शीघ्रं धावति। वानरः वने धावति। सः उद्याने व्यर्थं धावति। मनुष्यः पद्भ्यां धावति। मार्गे मार्गे रथः धावति। किमर्थं सः धावति ? सः तत्र शीघ्रं गन्तुं धावति। त्वं **धावसि**। त्वमिदानीं किमर्थं धावसि ? अहं **धावामि**। अहमधुना धावामि। त्वं तथा धावसि यथा अहं धावामि। सः **चलति**। ग्रामात् ग्रामं चलति। त्वं **चलिष्यसि**। त्वं श्वः प्रातःकाले भ्रमणाय चलिष्यसि किम् ? यदि त्वं मध्याह्ने रथेन चलिष्यसि तर्हि पञ्चवादनसमये नगरं गमिष्यसि। अहं **चलिष्यामि**। यदि अहमितः मध्याह्ने चलिष्यामि तर्हि नगरं कदा गमिष्यामि ? सः **भ्रमति**। सः दिवा कुत्र भ्रमति। सः स्वकीयं पुस्तकं न पठति इतः ततः भ्रमति च।

## ३ भक्षयति ...

सः **भक्षयति**। सः अन्नं भक्षयति। सः मिष्टान्नं भक्षयति। कः अत्र अन्नं भक्षयति ? तस्य कुक्कुरः अन्नं भक्षयति। सर्वः जनः अन्नं भक्षयति। इह मनुष्यः दिने दिने अन्नं भक्षयति। सिंहः कदापि अन्नं न भक्षयति। बालः फलं भक्षयति। सः नित्यं कदलीफलं भक्षयति। सः रात्रौ किमपि भक्षयति। सः फलं भक्षयति **स्म**। त्वं **भक्षयसि**। त्वं मोदकं भक्षयसि। त्वं फलं भक्षयसि किम् ? शृङ्गवेरं त्वं भक्षयसि किम् ? त्वं किमर्थं फलं न भक्षयसि ? अहं **भक्षयामि**। अहं फलं भक्षयामि। अहमोदनं भक्षयामि। अहं शुद्धमेव घृतं भक्षयामि। अहं मोदकमाम्रं च भक्षयामि। अहं सर्वदा फलं भक्षयामि अन्नं कदापि नैव भक्षयामि।

सः **भक्षयिष्यति**। किं सः अन्नं भक्षयिष्यति ? सः ओदनं भक्षयिष्यति। सः मांसं नैव भक्षयिष्यति। सः गृहं गमिष्यति मोदकं च भक्षयिष्यति। सः गृहं गमिष्यति मधुरं फलं भक्षयिष्यति। सः आम्रं कदा भक्षयिष्यति ? यदि सः वनं प्रातः गमिष्यति तर्हि आम्रं भक्षयिष्यति। त्वं **भक्षयिष्यसि**। त्वमाम्रं भक्षयिष्यसि। त्वं मोदकं भक्षयिष्यसि। किम् अद्य त्वमाम्रं भक्षयिष्यसि ? यदि त्वं मुद्गौदनं भक्षयिष्यसि तर्हि स्वस्थः भविष्यसि। अहं **भक्षयिष्यामि**। अहं मुद्गौदनं भक्षयिष्यामि। अहमोदनं नैव भक्षयिष्यामि। अहं तत्र गमिष्यामि फलं च भक्षयिष्यामि। अहं गृहं गमिष्यामि सूपं च भक्षयिष्यामि। यथा सः ओदनं भक्षयिष्यति तथा तत्र अहमाम्रं भक्षयिष्यामि।

सः **खादति**। मूषकः धान्यं खादति। सः **अत्ति**। अत्ता अन्नमत्ति। सः घृतं नैव अत्ति। जनः दन्तैः फलमत्ति। सः ओदनं दुग्धं सह अत्ति। त्वं **अत्सि**। त्वं कथं शर्करया सह ओदनमत्सि? सः **पचति**। सः तस्य गृहे अन्नं पचति।

सः **पिबति**। पुत्रः रसं पिबति। तत्र वृषभः जलं पिबति। मम स्वसा उष्णं जलं पिबति। तस्य पुत्रः पात्रेण जलं पिबति। तव बन्धुः रात्रौ एव उष्णं जलं पिबति। तस्य सुतः दुग्धं पिबति। सः रुग्नः बालः मधुरमपि दुग्धं न पिबति। सा रुग्ना बालिका मधुरमपि दुग्धं न पिबति। सः प्रातः किं पिबति मध्याह्ने च किं भक्षयति? किं सः अन्नं भक्षयति न वा? सः दुग्धमेव पिबति कदापि अन्नं नैव भक्षयति। सः न भक्षयति परन्तु अल्पमल्पं दुग्धं पिबति। सः प्रातःकाले दुग्धं पिबति मध्याह्ने च स्वादु भोजनं खादति। त्वं **पिबसि**। गोदुग्धं त्वं पिबसि किम्? त्वं प्रातः तक्रं पिबसि किम्? त्वं घृतं कथं पिबसि? त्वं शुद्धं गङ्गाजलं पिबसि। यथा त्वं दुग्धं पिबसि तथा एव सः पिबति। अहं **पिबामि**। अहं शीतं जलं न पिबामि। सः उष्णं जलं न पिबति। अहं रात्रौ नैव जलं पिबामि। अहं रात्रौ दुग्धं नैव पिबामि। गोदुग्धं मिष्टं भवति अतः तदेव अहं पिबामि।

सः **पास्यति**। सः मधुरं दुग्धं रात्रौ पास्यति। त्वं **पास्यसि**। किं त्वं रात्रौ उष्णं मिष्टं च दुग्धं न पास्यसि?

## ४ नयति ...

सः **नयति**। सः फलं नयति। सः उत्तरीयं नयति। सः पठनाय दीपं पुस्तकं च नयति। सः इदानीं दीपं कुत्र नयति? इदानीं सः वस्त्रं कुत्र नयति? सः वस्त्रं तत्र नयति। सः **आनयति**। सः अश्वमानयति। सः धौतं वस्त्रमानयति। सः अग्निमत्र आनयति। सः पुष्पमानयति। सः उद्यानात् पुष्पमानयति। सः सिन्धोः जलमानयति। सः समुद्रात् जलमानयति। सः मनुष्यः कूपात् जलमानयति। सः नगरात् धनमानयति। सः अन्धपुरुषः रक्तं वस्त्रमानयति। सा अन्धा स्त्री श्वेतां पुष्पमालामानयति। सः सदा नगरं गच्छति पुस्तकं च आनयति। सः वनं गच्छति अन्यं पुष्पं च आनयति। सः पीतमुत्तरीयं किमर्थम् आनयति? सः परकीयां गां किमर्थं गृहमानयति?

त्वं **नयसि**। रात्रौ जलमुपरि नयसि न वा? द्वारमिदानीं कुत्र नयसि? घृतं तत्र किमर्थं नयसि? त्वम् **आनयसि**। त्वं पुष्पमानयसि। कथं त्वमन्यत्पात्रमानयसि? अहं **नयामि**। अहं तस्य छत्रं नयामि। अहमिदानीं तस्य छत्रं नयामि। अहं तं स्वगृहं नयामि। अहं भक्षणार्थं घृतं नयामि। अहम् **आनयामि**। अहं जलमानयामि। अहमाम्रमानयामि। तडागात् जलमानयामि। अहमन्यत्पात्रं न आनयामि। गङ्गायाः जलमानयामि।

सः **नेष्यति**। कदा सः पुस्तकं तत्र नेष्यति? सः सायं तत्र पुस्तकं नेष्यति। सः सायं तत्र मसीपात्रं लेखनीं च नेष्यति। सः अद्य आगमिष्यति वस्त्रं च नेष्यति। सः **आनेष्यति**। सः किम् आनेष्यति? सः फलमन्नं च भक्षणार्थमानेष्यति। त्वम् **आनेष्यसि**। त्वमन्नमानेष्यसि किम्? यदि त्वं रथमानेष्यसि तर्हि अहं नगरं गमिष्यामि। त्वमौषधालयं कदा गमिष्यसि औषधं च कदा आनेष्यसि?अहं **नेष्यामि**। अवश्यं नेष्यामि। अहम् **आनेष्यामि**। अहं तत्र गमिष्यामि फलं च आनेष्यामि।

सः **ददाति**। सन्तुष्टः राजा द्रव्यं ददाति। नृपतिः शास्त्रस्य ज्ञात्रे द्रव्यं ददाति। सः सर्वं द्रव्यं तस्मै न ददाति किम्? सः दरिद्रः अस्ति अतः द्रव्यं न ददाति। सुजनः अन्यस्मै सुखं ददाति। दुर्जनः अन्यस्मै दुःखं ददाति। माता पुत्राय भोजनं ददाति। तस्य महिषी दुग्धं ददाति। त्वं **ददासि**। कस्मै

धनं ददासि ? त्वं कस्यै धनं ददासि ? यस्यै त्वमिच्छसि। मह्यं क्वथिकां ददासि किम् ? कस्मै कारणाय त्वं धनं न ददासि ?

सः **दास्यति**। कः तुभ्यमद्य भोजनं दास्यति ? तत्र उद्याने पण्डितः उपदेशं दास्यति। सः पूजनीयाय गुरवे अखिलं धनं दास्यति। अहं **दास्यामि**। यदत्र अस्ति तद् तुभ्यमहं दास्यामि। फलं स्वादु नास्ति कथं दास्यामि ?

त्वं **गृह्णासि**। किं त्वमलङ्कारं गृह्णासि ? त्वं नासिकया सुगन्धं गृह्णासि किम् ? अहं **गृह्णामि**। देवात् द्रव्यं गृह्णामि।

## ५ करोति ...

सः **करोति**। सः किं करोति ? सः तत्र किं करोति ? सर्वेण द्रव्येण सः किं करोति ? सः पुष्पमालां करोति किम् ? सः सर्वदा उद्यानं गच्छति पुष्पमालां च करोति। सः किमर्थं कोलाहलं करोति ? योधः युद्धं करोति। नृपतिः अरिणा सह युद्धं करोति। इदानीं सः सन्ध्यां करोति। सः रात्रौ भोजनं न करोति। सः सदा उद्यमं करोति। आचार्यः उपदेशं करोति। छात्रः प्रातरध्ययनं करोति। सः अग्निना जलमुष्णं करोति। चर्मकारः उपानत्करोति। नगरे नगरे जनः क्रीडां करोति। मालाकारः उद्याने कर्म करोति। सः मध्याह्ने आगच्छति तदा भोजनं च करोति। सा तत्र किं करोति ? सा पुत्रिका पुष्पमालां करोति। मम माता पुष्पमालां करोति। उद्यमशीला बालिका सदा उत्तमां पुष्पमालां करोति। तीर्थस्थाने सा तपस्यां करोति। सः कर्म करोति **स्म**। राजा युद्धं करोति स्म। रथकारः रथं करोति स्म। सुवर्णकारः सुवर्णस्य आभूषणं करोति स्म। सः मित्रेण सह भाषणं करोति स्म। यः एवं सदा करोति सः एव उत्तमः मनुष्यः भवति। या एवं सदा करोति सा अपि उत्तमा स्त्री भवति।

त्वं **करोषि**। त्वं किं करोषि ? त्वमिदानीं किं करोषि ? हे बालक त्वं किं करोषि ? त्वं तेन सह भाषणं करोषि। यदा त्वं व्रतं करोषि तदा किं भक्षयसि ? किमर्थं स्नानमिदानीमेव करोषि ? अहं **करोमि**। त्वं अग्निहोत्रं करोषि किम् ? भो मित्र किं त्वं प्रातरग्निहोत्रं न करोषि ? कुतः न करोमि सदा करोमि एव। तस्य आज्ञया अहमिदं कार्यं करोमि। कृष्णेन सह भाषणं करोमि।

त्वं **करिष्यसि**। त्वं श्वः प्रातः स्नानं करिष्यसि किम् ? पश्चात् किं करिष्यसि ? पश्चात् मध्याह्ने किं किं करिष्यसि ? त्वं कदा भ्रमणं करिष्यसि ? यदि प्रातः न करिष्यसि तर्हि कदा करिष्यसि ? यदा त्वं कठिनं कार्यं करिष्यसि तदा अहं तव साहाय्याय आगमिष्यामि। अहं **करिष्यामि**। सायं करिष्यामि। अहं वनं गमिष्यामि पुष्पमालां च करिष्यामि।

सः **अकरोत्**। रामः धर्मेण राज्यमकरोत्। अतः लोकः रामे प्रीतिमकरोत्।

सः **आरभते**। सः शुभं कर्म इदानीमारभते। त्वम् **आरभसे**। त्वमपि किं न आरभसे ? अहं **आरभे**। समयः न अस्ति अतः न आरभे। अहं इदानीं संस्कृतं पठितुमारभे। सः **रचयति**। धाता सकलं विश्वं रचयति।

## ६ कृदन्त तुमु

सेनापतिः **जेतुम्** उद्यमं करोति। अहं **श्रोतुं** गच्छामि। अहमद्य उपदेशं श्रोतुं गच्छामि। अहं **द्रष्टुम्** आगमिष्यामि। अहमपि तं द्रष्टुमागमिष्यामि। अहं **पठितुं** गच्छामि। अहं वेदं पठितुं नित्यं

गच्छामि। त्वं **प्रष्टुं** गच्छसि। त्वं प्रष्टुं गच्छसि किम्? त्वं तं प्रश्नं प्रष्टुं गच्छसि किम्? त्वमध्यापकस्य समीपे तं प्रश्नं प्रष्टुं गच्छसि किम्?

## ७ इच्छति ...

सः **इच्छति**। सः अन्नं इच्छति। सः भोजनाय पक्वमन्नं जलं च इच्छति। सः गन्तुमिच्छति। सः यदा गन्तुमिच्छति तदा गच्छति। तत्र सा अध्ययनं कर्तुमिच्छति। सः भक्षयितुमिच्छति। सः अन्नं भोक्तुमिच्छति। सः पातुमिच्छति। सः शुद्धं जलं पातुमिच्छति। सः पठितुमिच्छति। सः पुस्तकं पठितुमिच्छति। बालकः पठितुं न इच्छति। सः उत्थातुमिच्छति। सः आसनात् उत्थातुं न इच्छति। सः तत्र स्थातुमिच्छति। सः अटितुमिच्छति। सः सर्वदा वृथा अटितुमिच्छति। सः शीघ्रं गृहं गन्तुमिच्छति अतः एव धावति।

त्वम् **इच्छसि**। तद् त्वमिच्छसि। यद् त्वमिच्छसि तदहमानेष्यामि। त्वं गन्तुमिच्छसि। त्वमिदानीं कुत्र गन्तुमिच्छसि? त्वं कदा ग्रामं गन्तुमिच्छसि? केन सह त्वं गन्तुमिच्छसि? तत्र त्वमिदानीं किमर्थं गन्तुमिच्छसि? त्वमुत्थातुमिच्छसि। त्वं तस्मात् स्थानात् उत्थातुं न इच्छसि किम्? त्वं पातुमिच्छसि। त्वं जलं पातुमिच्छसि किम्? भोजनात् ऊर्ध्वं त्वं शीतं जलमपि पातुमिच्छसि किम्? त्वं धनं दातुमिच्छसि। यस्मै त्वं धनं दातुमिच्छसि सः तत्र नास्ति। यस्मै धनं दातुमिच्छसि किं सः दरिद्रः अस्ति? त्वं द्रष्टुमिच्छसि। किं त्वं तं द्रष्टुमिच्छसि? किमर्थं तं त्वमेवं द्रष्टुमिच्छसि? त्वं मसीपात्रं कुत्र स्थापयितुमिच्छसि।

अहम् **इच्छामि**। तव कुशलमिच्छामि। स्नानं कर्तुमिच्छामि। इदानीमेव स्नानं कर्तुमिच्छामि। तेन जलेन स्नानं कर्तुं न इच्छामि। अहं श्वः प्रातः स्नानं कर्तुं न इच्छामि। अस्य कूपस्य जलं बहु शीतमस्ति अतः अहं तेन स्नानं कर्तुं न इच्छामि। भोजनं कर्तुमिच्छामि। इदानीं भोजनं कर्तुमिच्छामि। अहं भोजनात्पूर्वं किमपि कर्म कर्तुं न इच्छामि। अहं पठितुमिच्छामि। अहं सर्वदा पुस्तकं पठितुमिच्छामि। अहं निर्धनः अस्मि पुस्तकं पठितुमिच्छामि। अहं भक्षयितुमिच्छामि। इदानीमहं फलं भक्षयितुमिच्छामि। अहं फलमन्नं च भक्षयितुमिच्छामि। अहं पातुमिच्छामि। अहं उष्णं जलं पातुं न इच्छामि। अहं कदा अपि उष्णं जलं पातुं न इच्छामि। गङ्गाजलं पातुमिच्छामि। गङ्गाजलमतीव निर्मलमस्ति अतः तदेव पातुमिच्छामि। अहं द्रष्टुमिच्छामि। अहं तं शीघ्रं द्रष्टुमिच्छामि। अहं सदा वक्तुमिच्छामि। अहं ज्ञातुमिच्छामि। सः इदानीं किं करोति इति अहं ज्ञातुमिच्छामि। पठितुं लेखितुं च इच्छामि। पुस्तकं पठितुं पत्रं च लेखितुमिच्छामि। अहं उत्तममन्नं दातुमिच्छामि। अहं तस्यै नारिकायै उत्तममन्नं दातुमिच्छामि। अहं दातुं इच्छामि। अहं तस्मै बालकाय किमपि दातुं न इच्छामि।

सः **शक्नोति**। सः गन्तुं शक्नोति। सः गन्तुं शक्नोति न वा? सः क्रीडितुं शक्नोति। सः लेखितुं शक्नोति। सः वरं लेखितुं शक्नोति। सः तव दूतः लेखितुं न शक्नोति। मम स्त्री संस्कृतं वक्तुं शक्नोति। सः भक्षयितुं शक्नोति। सः इदानीं मुखेन फलं भक्षयितुं न शक्नोति। सः प्रक्षालयितुं शक्नोति। रक्तं वस्त्रं साधु प्रक्षालयितुं न शक्नोति। सः बहिर्गन्तुं न शक्नोति। सः स्वगृहमिदानीं रक्षति अतः बहिर्गन्तुं न शक्नोति। बालिका पठितुं शक्नोति। या बालिका पाठशालां गच्छति सा एव पठितुं शक्नोति।

त्वं **शक्नोषि**। त्वं गन्तुं शक्नोषि। त्वं तत्र गन्तुं शक्नोषि किम्? त्वं अन्नं दातुं शक्नोषि। त्वं मह्यं पक्वमन्नं दातुं शक्नोषि किम्? त्वं स्थातुं शक्नोषि। त्वमत्र सायंकालपर्यन्तं स्थातुं शक्नोषि किम्? त्वं संस्कृतं वक्तुं न शक्नोषि। किमेतद्वरमस्ति यद् त्वं स्वभाषां वक्तुं न शक्नोषि? अहं

**शक्नोमि**। अहं वक्तुं शक्नोमि। अहम् आंग्लभाषां वक्तुं न शक्नोमि। अहं लेखितुं न शक्नोमि। अहं तस्य भाषणं श्रोतुं शक्नोमि। अहं तु न पातुं शक्नोमि।

## ८ वदति ...

सः **वदति**। कः एवं वदति? तत्र कः वदति? सः किं वदति इदानीम्? तस्य माता किं वदति? सः किं किं वदति? सः शीघ्रं वदति। सः किमपि न वदति। जनः मुखेन वदति। मनुष्यः जिह्वया वदति। वक्ता सत्यं वदति। सः वक्ता सदा एव अप्रियं वदति। सः एवं वृथा वदति। सः वृथा एव असत्यं वदति। सः कदापि असत्यं नैव वदति। आचार्यः शिष्येण सह वदति। गुरुः कुमारिकया सह कथां वदति। सदा मूर्खः मूर्खेण सह वदति। सः सदा तत्र तिष्ठति उच्चैः वदति च। सः असत्यं वदति। यः असत्यं वदति कः अपि तस्य विश्वासं न करोति। यदा सः असत्यं वदति तदा तस्य मुखं मलिनं भवति। यः सत्यं वदति तस्य सर्वजनः विश्वासं करोति। यथा त्वं वदसि तथा सः न वदति। यस्य ज्ञानं नास्ति तस्मिन् विषये सः किमर्थं वदति? सः उच्चैः न वदति अतः अहं तस्य भाषणं श्रोतुं न शक्नोमि।

त्वं **वदसि**। त्वं सर्वदा वदसि। त्वं किं सर्वदा एव वदसि? किमर्थम् अनृतं वदसि? यथा त्वं वदसि तथा एव अस्ति। येन सह त्वं वदसि सः न साधु अस्ति। यदि त्वमुच्चैः वदसि तदा अहं तव भाषणं श्रोतुं शक्नोमि। अहं **वदामि**। सत्यं वदामि। यदहं वदामि तद् सत्यमस्ति। अहं कदापि असत्यं नैव वदामि। प्रातः स्नानं सन्ध्योपासनं च श्रेष्ठं कर्म अस्ति इति अहं वदामि।

सः **जल्पति**। सः एवं वृथा जल्पति तद् न श्रोतुं योग्यमस्ति। सः **गर्जति**। ग्रामे शूकरः गर्जति। आकाशे मेघः अधुना गर्जति। वने सिंहः गर्जति। उद्याने सिंहः सायंप्रातः च गर्जति। त्वं **गर्जसि**। त्वं वृथा किमर्थं गर्जसि?

सः **शृणोति**। मनुष्यः कर्णाभ्यां शृणोति। मनुष्यः कर्णाभ्यां शृणोति नेत्राभ्यां च पश्यति। त्वं **शृणोषि**। त्वं तस्य व्याख्यानं शृणोषि किम्? यदहं वदामि तद् न शृणोषि किम्? अहं **शृणोमि**। अहं कर्णाभ्यां तव अतीव मधुरं भाषणं शृणोमि।

## ९ पठति ...

सः **पठति**। पण्डितः पुस्तकं पठति। सः रात्रौ दीपेन पुस्तकं पठति। मम पुत्रः अधुना पुस्तकं पठति। मम बन्धुः इदानीं पुस्तकं पठति। सः आचार्यः सदा पुस्तकं पठति। तस्य पुत्रः पाठशालायां पठति। सः उद्यमशीलः बालः सदा उत्तमं पुस्तकं पठति। का पुत्रिका पुस्तकं पठति? सा बाला तस्मिन् गृहे न पठति। यः पुस्तकं पठति सः एव मम भ्राता अस्ति। सः उच्चैः पठति अतः कोलाहलः भवति। यस्यां पाठशालायां मम पुत्रः पठति तव अपि तस्यामेव पठति। सः किमर्थं न पठति? सः ज्वरेण पीडितः अस्ति अतः न पठति। त्वं **पठसि**। संस्कृतं किं न पठसि? त्वमिदानीं किं तद् पुस्तकं पठसि? अहं **पठामि**। अहं न पठामि। अहं पत्रं पठामि। कवेः काव्यं पठामि।

सः **लिखति**। सः किं लिखति? सः पत्रं लिखति। पुत्रः पित्रे पत्रं लिखति। सः नवीनं पुस्तकं लिखति किम्? तस्य भ्राता वरं न लिखति। सः **आलिखति**। चित्रकारः उत्तममालेख्यमालिखति। त्वं **लिखसि**। त्वमिदानीं किं लिखसि? त्वमपि तथा न लिखसि यथा सः लिखति। अहं **लिखामि**। अहमत्र लिखामि। अहं रामाय पत्रं लिखामि।

सः **जानाति**। सः त्वां जानाति। सः त्वां न जानाति किम्? सः सर्वं शास्त्रं जानाति। सः शास्त्रस्य सर्वं ज्ञानं जानाति। त्वं **जानासि**। त्वं कथं जानासि? त्वं तरणं जानासि। किं त्वं जले तरणं जानासि? तस्य स्थानं त्वं जानासि किम्? सः कदा आगमिष्यति त्वं जानासि किम्? मम रक्तं वस्त्रं कुत्र अस्ति जानासि किम्? तव भोजनं सिद्धमस्ति इति त्वं जानासि किम्? सः अतीव दरिद्रः अस्ति इति त्वं न जानासि किम्? अहं **जानामि**। तदहं जानामि। भो मित्र इदानीं तु अहं न जानामि। तस्य स्थानं इदानीं न जानामि। सः कुत्र अस्ति इति अहं न जानामि। अहमपि नैव जानामि परन्तु सूर्यसिंहः जानाति। नहि अहं न जानामि परन्तु सः रात्रौ आगमिष्यति। त्वं **ज्ञास्यसि**। यदि त्वं तत्र न गमिष्यसि तर्हि तद् कथं ज्ञास्यसि।

सः **विस्मरति**। सः यद् पठति तद् कदापि न विस्मरति। त्वं **स्मरसि**। त्वं तद् स्मरसि किम्? यद् त्वं पठसि तद् सर्वदा स्मरसि न वा? अहं **विस्मरामि**। यदहं पठामि तद् कदापि न विस्मरामि। त्वं **विस्मरिष्यसि**। यदि त्वमेवं विस्मरिष्यसि तर्हि कथं पठिष्यसि? अहं **विस्मरिष्यामि**। अतः ऊर्ध्वं न विस्मरिष्यामि।

सः **आज्ञापयति**। सः मामाज्ञापयति। सः तं कदापि न आज्ञापयति। सः तं **किमर्थम्** आज्ञापयति? यथा गुरु मां आज्ञापयति तथैव अहं करोमि। त्वं **आज्ञापयसि**। त्वं मामधुना किमाज्ञापयसि? अहं **आज्ञापयामि**। अहं त्वां न आज्ञापयामि।

## १० स्वपिति ...

सः **स्वपिति**। मातामही स्वपिति। सः उद्याने वृक्षस्य अधः इदानीं स्वपिति। वानरः रात्रौ वृक्षस्य उपरि स्वपिति। यदि सः स्वपिति तर्हि तदा त्वं किं करोषि? त्वं **स्वपिषि**। त्वं रात्रौ कदा स्वपिषि? यदा त्वं स्वपिषि तदा तव भ्राता कुत्र भवति? अहं **स्वपिमि**। अहं दशघण्टासमये स्वपिमि।

सः **पश्यति**। मनुष्यः अश्वं पश्यति। बालकः रविं पश्यति। सेनापतिः सैन्यं पश्यति। वत्सः रथं न पश्यति। सः रक्तं पुष्पं पश्यति। सः वनस्य मार्गं पश्यति। ईश्वरः सदा सर्वं पश्यति। लोकः नेत्राभ्यां पश्यति। त्वं **पश्यसि**। शत्रुं पश्यसि किम्? तं पुरुषं त्वं पश्यसि किम्? अन्तरिक्षे सूर्यं पश्यसि किम्? त्वं कं पश्यसि? यं त्वं पश्यसि सः कः अस्ति? भुवनस्य कर्तारमीश्वरं कुत्र पश्यसि? अहं **पश्यामि**। अहमधुना आलेख्यं पश्यामि। अहं नेत्राभ्यां विश्वं पश्यामि। रात्रौ सूर्यं न पश्यामि। अत्र दीपः नास्ति अतः अहं किमपि न पश्यामि। सः **दर्शयति**। आचार्यः धर्मस्य मार्गं शिष्याय दर्शयति।

सः **प्रक्षालयति**। सः हस्तौ पादौ च प्रक्षालयति। त्वं **प्रक्षालयसि**। त्वमिदानीं किं प्रक्षालयसि? त्वमिदानीमेव किमर्थं तद् प्रक्षालयसि? सः जलेन वस्त्रं प्रक्षालयति। अहं **प्रक्षालयामि**। अहं वस्त्रं मुखं च प्रक्षालयामि।

सः **तिष्ठति**। सः तत्र तिष्ठति। सः दूरं तिष्ठति। सः पुरुषः आतपे तिष्ठति। याचकः मार्गे तिष्ठति। तस्य जनकः गृहे तिष्ठति। सः तत्र तूष्णीं तिष्ठति। बालकः तूष्णीं नैव तिष्ठति। रक्षकः द्वारात् बहिः तिष्ठति। रामः मित्रेण सह कुत्र तिष्ठति? सः तत्र तिष्ठति लिखति च। मेषः धावति परन्तु अश्वः तिष्ठति। सः **उत्तिष्ठति**। कः प्रथममुत्तिष्ठति? सः मुनिः प्रातरेव उत्तिष्ठति। उत्तमः पुरुषः शोभने प्रातःकाले उत्तिष्ठति। सः प्रातरुत्तिष्ठति बहिर्गच्छति तत्र मुखं प्रक्षालयति। सः प्रातः उत्तिष्ठति स्म। त्वं **तिष्ठसि**। किं त्वं तस्य गृहे तिष्ठसि। किमर्थम् अत्र मार्गे तिष्ठसि?

सः **स्थास्यति**। यदि सः अत्र स्थास्यति तर्हि वरं भविष्यति। त्वं **स्थास्यसि**। त्वं यत्र स्थास्यसि अहमपि तत्र स्थातुमिच्छामि। अहं **स्थास्यामि**। अहं तत्र सायंकालपर्यन्तं स्थास्यामि।

सः **स्थापयति**। सः मम पुस्तकं कुत्र स्थापयति? अहं **स्थापयामि**। अहं स्वरथमत्र न स्थापयामि।

सः **क्रीडति**। सः तत्र कुण्डलेन क्रीडति। सः कदापि मार्गे न क्रीडति। बालकः वने क्रीडति किम्? सः न तथा सुष्ठु क्रीडति यथा मम मित्रः। सः बालः मार्गे क्रीडति स्म। त्वं **क्रीडसि**। त्वं बालकेन सह क्रीडसि। त्वं बालकेन सह किमर्थं क्रीडसि इदानीम्? अहं **क्रीडामि**। अहमत्र क्रीडामि। अहं तु न क्रीडामि। यदा त्वं पठसि तदा अहं क्रीडामि।

## ११ क्रीणाति ...

त्वं **क्रीणासि**। किं क्रीणासि पुष्पं फलं वा? अहं **क्रीणामि**। न अहमिदानीं पुष्पं क्रीणामि नापि फलम्। अहं पुस्तकं मसीपात्रं लेखनीं च क्रीणामि। सः **वसति**। सः एव पर्वतः यत्र वसिष्ठः मुनिः वसति। अहं तं ग्रामं गच्छामि यत्र वेदस्य ज्ञाता वसति। सः आचार्यः सदा अत्र एव निवसति। सः **हसति**। सः किमर्थं हसति? अहं **हसामि**। यदा सः धावति तदा अहं हसामि। सः **तुष्यति**। सः कदापि न तुष्यति। सः **पृच्छति**। सः तं मार्गं पृच्छति। सः **प्राप्नोति**। सः नृपस्य प्रसादेन अतीव धनं प्राप्नोति। मनुष्यः ईश्वरस्य प्रसादेन सर्वं सुखं प्राप्नोति। सः **खनति**। सः कूपं खनति। सः अद्य व्यर्थं खनति। सः भूमिमद्य किमर्थं खनति?

सः **रक्षति**। सः गृहं रक्षति किम्? सः स्वकीयां भूमिं रक्षति न वा? ईश्वरः पालकः अस्ति सर्वं च विश्वं सर्वदा रक्षति। सः न केवलं गृहं रक्षति परन्तु उद्यानमपि वरं रक्षति। द्वारपालकः द्वारि तिष्ठति गृहं च रक्षति।

सः **चोरयति**। चौरः धनं चोरयति। तस्य पुत्रः पुस्तकं चोरयति। सः **जयति**। भूपतिः शत्रुं जयति। **सः पतति**। वृक्षात्फलं पतति। सः अतीव धावति अतः पतति च। त्वं **पतिष्यसि**। यदि त्वमेवं करिष्यसि तर्हि पतिष्यसि एव। सः **ज्वलति**। तत्र दीपः ज्वलति। सः **त्यजति**। सः असत्यं शीघ्रमेव त्यजति। यथा यथा सः मालिन्यं त्यजति तथा तथा शुद्धः भवति। सः **आरोहति**। वानरः हस्ताभ्यां पादाभ्यां च वृक्षमारोहति।

सः **ताडयति**। नृपतिः चौरं ताडयति। कुमारः व्याघ्रं ताडयति। मनुष्यः दण्डेन मूषकं ताडयति। अयं सैनिकः अश्वं ताडयति। सः मां न ताडयति। सः किमर्थं मार्जारं ताडयति? सः तमेव किमर्थं ताडयति। सः इदानीं तं ताडयति यतः सः न लिखति। यदि बालकः असत्यं वदति तर्हि गुरुः तं ताडयति। अहं **ताडयिष्यामि**। अहं तमवश्यं ताडयिष्यामि।

सः **पीडयति**। सः मां वृथा पीडयति। भो मित्र इदानीं मां बुभुक्षा अतीव पीडयति।

## १२ लोट् प्रेरणा

त्वं **देहि**। एकं रूप्यकं देहि। अन्यत् वस्त्रं देहि। शुद्धं धौतं वस्त्रं देहि। शीतं दुग्धं देहि। त्वमधुना पुस्तकं देहि। मह्यं वस्त्रं देहि। मह्यमाम्रं देहि। तस्यै जलं देहि। मनुष्याय ज्ञानं देहि। तस्मै जलं देहि। देवाय जलं देहि। अश्वाय जलं देहि। तस्मै पुष्पं देहि। तस्मै फलं न देहि। तस्मै कुण्डलिनीं देहि। ब्राह्मणाय धनं दुग्धं च देहि। मुद्गौदनं याचकाय देहि। पुत्रिकायै अन्नं देहि। तस्मै धनं वस्त्रं अन्नं च देहि। उष्णं जलं तस्मै इदानीमेव देहि। पुस्तकं लेखिनीं मसीपात्रं च मह्यं देहि। अधुना मह्यं पठनाय पुस्तकं देहि। पानार्थं मह्यं मधुरं दुग्धं देहि। स्नानाय जलं देहि। भक्षणाय फलं देहि।

पानाय मह्यं जलं देहि। अत्र त्वमागच्छ फलं च देहि। अधुना बुभुक्षा न अस्ति अन्नं न देहि। इदानीं पिपासा अस्ति मह्यं शीतलं जलं देहि। यः गङ्गाजलं पातुमिच्छति तस्मै शुद्धं गङ्गाजलं देहि। यः कूपस्य जलं पातुमिच्छति तस्मै कूपस्य एव जलं देहि। यस्य पुस्तकमस्ति तस्मै देहि। फलं यथा अस्ति तथा एव देहि।

त्वं **पश्य**। उद्यानं पश्य। वृक्षे मूषकं पश्य। भानोः अंशुं पश्य। रवेः प्रकाशं पश्य। आकाशे तारकान् पश्य। तं मुनिं पश्य। तं बालकं पश्य। तां स्त्रीं पश्य। तं हिमगिरिं पश्य। तस्य अश्वस्य पुच्छं पश्य। अत्र दीपं पश्य। हे मित्र जलस्य तरङ्गं पश्य। पश्य सः किमर्थं हसति? पश्य सः तत्र अस्ति। पश्य सः तत्र नास्ति। पश्य सः बालः कथं शीघ्रं धावति। पश्य तां दुःखितां नारीम्। पश्य तं दुःखितं मित्रम्। पश्य कथं सः रथः शीघ्रं धावति। पश्य इदानीं सः तत्र कथं खनति। पश्य तद् धूम्रयानं कथं शीघ्रं गच्छति। पश्य कथं सः मुनिना सह गच्छति। पश्य अहं कथं पिबामि। तं पुत्रं तस्मिन् स्थाने पश्य। तां पुत्रीं तस्मिन् स्थाने पश्य। तां पाठशालां पश्य तस्यां मम पुत्रः पठति। मण्डूकः जले अस्ति तं पश्य। कपिः वृक्षे अस्ति तं पश्य। एकः विहगः वृक्षे अस्ति तं पश्य। याचकः तत्र मार्गे तिष्ठति तं पश्य। सत्वरं अत्र आगच्छ पीतं पुष्पं च पश्य। तत्र एव पश्य शीघ्रं च अत्र आनय। मित्र पश्य तस्य गृहमत्र एव अस्ति।

त्वं **दर्शय**। कुमारस्य पुस्तकं कुत्र अस्ति दर्शय।

त्वं **गच्छ**। त्वं गृहं गच्छ। त्वं नीचैः गच्छ। त्वमपि तत्र गच्छ। त्वं प्रष्टुं गच्छ। तर्हि अद्य गच्छ। येन केनापि मार्गेण गच्छ। त्वमिदानीं यत्र कुत्र अपि गच्छ। भो मित्र इदानीं शनैः अधः गच्छ। अध्यापकस्य समीपं सत्वरं गच्छ। रथमानय वनं च श्वः प्रभाते गच्छ। त्वमुपरि गच्छ अहमधः गमिष्यामि। यत्र इच्छसि तत्र द्रुतं गच्छ। तत्र अग्निः ज्वलति अतः तत्र त्वं न गच्छ। इदानीं मेघः गर्जति अतः बहिर्न गच्छ। अतः अन्येन मार्गेण एव तं ग्रामं गच्छ। यत्र सः अस्ति तत्र त्वं शीघ्रं गच्छ। यदा चौरः तत्र गमिष्यति तदा त्वमपि तत्र एव गच्छ। यदा आचार्यः तत्र गमिष्यति तदा एव त्वं तत्र गच्छ। तत्र न गच्छ इति सः त्वामाज्ञापयति।

त्वम् **आगच्छ**। त्वमवश्यमागच्छ। अत्र त्वं शीघ्रमागच्छ। मया सह त्वमपि आगच्छ। अद्य मया सह आगच्छ नदीम्। यदि त्वं तद् ज्ञातुमिच्छसि तर्हि आगच्छ। यदि त्वं कूपस्य जलं पातुमिच्छसि तर्हि मया सह आगच्छ। सः पण्डितः रात्रौ रामस्य कथां कथयिष्यति त्वमपि श्रोतुमागच्छ।

त्वं **नय**। स्नानाय जलं नय। मया अधीतं ग्रन्थं त्वं नय। मुद्गौदनं देहि दुग्धं च तत्र नय। यदा त्वं तत्र गमिष्यसि तदा मम पुस्तकमपि तत्र नय। त्वम् **आनय**। त्वं तं रथमानय। पुस्तकमानय। अन्यत्पुस्तकमानय। तमत्र आनय। तं वस्त्रं च आनय। पीतं पुष्पं न आनय। आपणात् वस्त्रमानय। त्वमत्र शीघ्रमोदनमानय। बालिकायाः वस्त्रमानय। अन्यत्पुस्तकमानय। पात्रमत्र न आनय। अत्र रक्तं दीपं शीघ्रमानय। भो मित्र पीतं वस्त्रं न आनय। रथमत्र आनय फलं च तत्र नय। पठनाय दीपं पुस्तकं च अत्र आनय। इदानीमेव उद्यानं गच्छ रक्तं पुष्पं च आनय। त्वमिदानीमेव औषधालयं गच्छ औषधं च आनय। यदस्ति तत्र तदत्र त्वमानय। यदि सः तत्र अस्ति तर्हि तमत्र आनय। यदि त्वं शीतं जलमपि आनेतुं शक्नोषि तर्हि शीघ्रमानय। यदि तत्र नवीनं शुद्धं स्वादु च घृतं नास्ति तर्हि तद् न आनय। यदि त्वमागन्तुमिच्छसि तर्हि मम मातरमपि आनय। शीघ्रं रथमानय अहमन्यं नगरं गन्तुमिच्छामि। यदा त्वं गङ्गाजलमानेष्यसि तदा कूपस्य जलमपि आनय। भो मित्र हवनकुण्डमहमानयामि त्वमिन्धनमानय।

त्वं **कुरु**। दयां कुरु। बालके दयां कुरु। तथा कुरु। सन्ध्यां कुरु। रवये नमः कुरु। ज्ञात्रे नमः कुरु। त्वं देवतायाः पूजां कुरु। अश्वस्य पालनं कुरु। सदा अध्ययनं कुरु। पश्चात् भोजनं कुरु। कदापि अन्यायं न कुरु। सुमतिना सह मित्रतां कुरु। दुर्मतिना सह मित्रतां न कुरु। अस्य कूपस्य जलेन स्नानं कुरु। पाठशालायां केनापि सह कलहं न कुरु। त्वं गच्छ भोजनं च कुरु। प्रथमं शुद्धं जलमानय पश्चात् भोजनं कुरु। यथा तव गुरुः आज्ञापयति तथा कुरु। यदहं त्वामाज्ञापयामि तद् कर्म शीघ्रं कुरु। त्वं तडागस्य समीपं गच्छ तत्रैव च स्नानं कुरु। अन्यस्य धनं न **स्वीकुरु**। स्वीकुरु अत्र शीतं मिष्टं च दुग्धमस्ति।

त्वं **भक्षय**। उद्यानं गच्छ फलं च भक्षय। अत्र आगच्छ मधुरं च फलं भक्षय। त्वमिदानीं ज्वरितः असि अतः अल्पमन्नं भक्षय। अद्य उष्णं दिनमस्ति अतः आम्रं न भक्षय। त्वं **पिब**। जलं पिब। मोदकं शीघ्रं भक्षय पश्चात् जलं पिब।

त्वं **वद**। सत्यं प्रियं च वद। त्वं कदापि असत्यं मा वद। अत्र त्वं किमर्थं तिष्ठसि वद। कोलाहलं न कुरु इति त्वं तं वद। वद त्वं तद् पुस्तकं पाठसि न वा? त्वं **कथय**। त्वं तस्मै कथय। येन सह वदसि तमेवं कथय। कोलाहलं न कुरु इति तं कथय। त्वं **ब्रूहि**। सत्यं ब्रूहि। ब्रूहि त्वं प्रातः सन्ध्यां करोषि न वा?

त्वं **गृहाण**। एतद् नवनीतं गृहाण। भो मित्र एतदासनं गृहाण। बालकात्पुस्तकं गृहाण। तस्य मलिनहस्तात्कुण्डलिनीं न गृहाण। यदि त्वं सूपमिच्छसि तर्हि गृहाण। अत्र आगच्छ मधुरं दुग्धं च गृहाण। मम पादुके गृहाण तस्मै च देहि।

त्वं **पठ**। दीपस्य प्रकाशे पुस्तकं पठ। मया अधीतं पुस्तकं त्वं पठ। यदि सः वेदं पठति तर्हि त्वमपि वेदं पठ। त्वं **लिख**। मित्राय पत्रं लिख। त्वं पत्रं शीघ्रं लिख। यद् त्वं लेखितुमिच्छसि तदत्र लिख।

त्वं **स्मर**। कृतं कर्म स्मर। त्वं **शृणु**। स्तोत्रं शृणु। मया अधीतां कथां त्वं शृणु। शृणु अद्य अहं तत्र नैव गमिष्यामि।

त्वं **तिष्ठ**। यदि वरं कर्म कर्तुमिच्छसि तर्हि एव अत्र तिष्ठ। शृणु त्वमिदानीं वनं न गच्छ अत्र एव तिष्ठ। त्वम् **उत्तिष्ठ**। हे बालक त्वमुत्तिष्ठ। भो शिष्य उत्तिष्ठ आलस्यं न कुरु। शीघ्रमुत्तिष्ठ तत्र च सत्वरमागच्छ। प्रातरेव उत्तिष्ठ व्यायामं च कुरु।

त्वं **प्रक्षालय**। प्रथमं हस्तौ पादौ च प्रक्षालय। अद्य सायंकाले जलमानय वस्त्रं च प्रक्षालय। प्रातरेव उत्तुष्ठ मुखं च प्रक्षालय। त्वं तत्र गच्छ वस्त्रं च प्रक्षालय।

त्वं **उपविश**। तत्र उपविश यत्र बालकः स्वपिति। अत्र एव उपविश व्याख्यानं च शृणु। दीपं **प्रज्वालय**। यदा प्रकाशः न भवति तदा दीपं प्रज्वालय। त्वं **स्थापय**। दुग्धं तत्र स्थापय। त्वं **क्रीड**। अक्षैः मा क्रीड।

## १३ कृदन्त .क्त

सः **गतः**। सः इदानीं कुत्र गतः? सः प्रियवादी आचार्यः कुत्र गतः? गृहे चौरः आगतः? केन मार्गेण सः गतः? सः पर्वतस्य उपरि गतः। सः स्वप्तुं स्वगृहं गतः। सः इदानीमेव गृहात् बहिर्गतः। विश्वामित्रेण सह रामचन्द्रः वनं गतः। भार्यया सह रामः वनं गतः। रामेण सह लक्ष्मणः वनं गतः। सः तत्र दीपं स्थापयितुं गतः। तस्य पुत्रः पाठशालां गतः। एकदा अहं वनं

गतः। एकस्मिन् दिवसे अहं तस्य गृहं गतः। यदा सः वनं गतः तदा अहं न गतः। यदा सः आगतः तदा एव त्वं गतः। मम भ्राता इदानीं कुत्र गतः न जानामि। सः व्यर्थं तत्र गतः तस्य पुस्तकं तत्र नास्ति। सा **गता**। सुता कुत्र गता ? सा मात्रा सह नगरं गता। अम्बा बालिकया सह अद्य ग्रामं न गता। अद्य सा बालिका अम्बया सह वनं गता। या बालिका नगरं गता सा कस्य पुत्री ?

सः **आगतः**। नृपः अत्र आगतः। नगरे अद्य नृपः आगतः। सः नगरात् अत्र आगतः। पूजनीयः गुरुः आगतः। रविः आकाशे आगतः। हिमगिरौ मेघः आगतः। पश्चात्तत्र एकः खगः आगतः। बालकः अधुना न आगतः। तस्य गृहे अद्य यतिः आगतः। अन्यस्मिन् दिने सः अत्र आगतः। सः मुनिः अयोध्यानगरातत्र आगतः। सः मुनिः कस्मात् स्थानातत्र आगतः इति त्वं जानासि किम् ? सः उत्थाय गृहातत्र एव आगतः। अहं जलं पातुमत्र आगतः। पश्य सः युवा अत्र आगतः। कदा सः आगतः इति अहं न जानामि। सः मुनिः कस्मात् ग्रामातत्र आगतः अहं नैव जानामि। यस्मात् स्थानात् त्वमद्य आगतः तस्मात् स्थानात् सः अपि आगतः। यः पुरुषः ग्रामातागतः सः इदानीमत्र नास्ति। इदानीं रात्रिः आगतः गाढः अन्धकारः भविष्यति अतः प्रदीपं प्रज्वालयिष्यामि। तद् **आगतम्**। श्रीरामचन्द्रस्य पत्रम् आगतम्। सा **आगता**। पूजनीया माता आगता।

तद् **नीतम्**। तद् पुस्तकं तेन नीतम्। तस्य पुस्तकं त्वया नीतं किम् ? तस्य पुस्तकं तव मित्रेण नीतम्। त्वया फलं नीतं किम् ? तद् **आनीतम्**। यमुनायाः जलमानीतम्। तेन धनं न आनीतम्। सेनापतिना सैन्यमत्र आनीतम्। मया कूपात् जलमानीतम्। तेन मित्रस्य गृहात् पुस्तकम् आनीतम्। यद् जलं त्वया आनीतं तद् शुद्धं नास्ति। सा **आनीता**। त्वया कस्मात् स्थानात् सा पुष्पमाला आनीता।

सः **कृतः**। तेन अपराधः कृतः। रविणा प्रकाशः कृतः। साधुना उपदेशः कृतः। अखिलः संसारः ईश्वरेण कृतः। तद् **कृतम्**। तेन किं कृतम् ? इदानीं त्वया किं कृतम् ? बालकेन स्नानं कृतम्। मया तद् कर्म न कृतम्। अखिलया सेनया युद्धं कृतम्। तेन तद् वरं कर्म अद्यापि न कृतम्।

सः **दत्तः**। तस्मै केनचिदेकः मोदकः दत्तः। तद् **दत्तम्**। देवेन ज्ञानं दत्तम्। ईश्वरेण धनं दत्तम्। तव पित्रा धनं दत्तम्। अत्र तेन शोभनं व्याख्यानं दत्तम्। यस्मै त्वया अन्नं दत्तं तस्मै जलमपि देहि।

सः **जातः**। मध्याह्नसमयः जातः। पश्य प्रातःकालः जातः। मम भ्रमणस्य समयः जातः अतः तत्र गन्तुं न शक्नोमि। सः अतीव दुर्बलः जातः अतः गन्तुं न शक्नोति।

सः **पतितः**। तस्य पुत्रः कूपे पतितः। पर्वतात् वृक्षः पतितः। सः शूरपुरुषः इदानीं युद्धे पतितः। तद् **पतितम्**। तरोः फलं पतितम्। पुष्पं जले पतितम्। तस्य पुस्तकं पतितम्। मार्गे तस्य हस्तात्पुस्तकं पतितम्। सा **पतिता**। तस्य हस्तात् माला पतिता।

तद् **रक्षितम्**। तस्मिन् पात्रे मया दुग्धं रक्षितम्। यस्मिन् पात्रे दुग्धं रक्षितं तद् पात्रं भिन्नम्। स्वकीयं द्रव्यं रक्षितमस्ति। यदि त्वया स्वगृहं रक्षितं तर्हि वरं कृतम्।

सः **दृष्टः**। तत्र मया एकः वृक्षः दृष्टः। तेन बालकेन तत्र तडागे एकः मण्डूकः दृष्टः। अतीव कालः जातः यदा मया सः दृष्टः। तद् **दृष्टम्**। यद् त्वया दृष्टं तद् सर्वं कथय। मया तदद्यापि न दृष्टम्। सा **दृष्टा**। मया अद्य प्रातःकाले उत्तमा गौः गङ्गायाः तीरे दृष्टा।

तद् **उक्तम्**। गीतायां किमुक्तम्? सः उक्तमेव पुनः पुनः वदति। यथा त्वया उक्तं तथा करोमि। तद् **श्रुतम्**। सः पुरुषः श्रुतमपि न स्मरति। पुनः पुनः श्रुतमपि लेखितुं न शक्नोमि। सः यथा श्रुतमस्ति तथा एव वदति। त्वया तस्य व्याख्यानं श्रुतं किम्?

तद् **पठितम्**। मया शास्त्रं न पठितम्। सः पठितमपि पाठं न स्मरति। अखिलं पुस्तकं मया पठितम्। यया पुस्तकं पठितं तस्यै धनं वस्त्रं च देहि।

सः **लिखितः**। तेन बुधेन ग्रन्थः लिखितः। तद् **लिखितम्**। व्यासेन महाभारतं लिखितम्। तेन रामायणं नाम पुस्तकमार्यभाषायां लिखितम्।

सः **स्थापितः**। यत्र ह्यः स्थापितः तत्र एव अस्ति। सा **स्थापिता**। त्वया सा मुक्ता कुत्र स्थापिता?

सः **हतः**। रामेण युद्धे रावणः हतः। तेन शूरेण व्याघ्रः हतः। ते **हताः**। यथा रामेण राक्षसाः हताः तथा एव लक्ष्मणेन अपि राक्षसाः हताः।

सः **धृतः**। भृत्येन हस्ते दण्डः न धृतः। मित्रेण हस्ते श्वेतः दण्डः धृतः। कुमारेण हस्ते मोदकः धृतः। सः **अर्पितः**। मया उत्तमाय ब्राह्मणाय मोदकः अर्पितः। तद् **अर्पितम्**। मया उत्तमाय मित्राय पुस्तकमर्पितम्। तद् **प्राप्तम्**। नृपस्य प्रसादेन तेन धनं प्राप्तम्।

तद् **निर्मितम्**। तेन अद्भुतमालेख्यं निर्मितम्। हे धाता त्वया एव सर्वमेतद् निर्मितम्। तद् **रचितम्**। वाल्मीकिना रामायणं रचितम्। तेन उत्तमं पुस्तकं रचितम्।

सः **भक्षितः**। मुनिना मोदकः न भक्षितः। तद् **भक्षितम्**। तद् फलं मया भक्षितम्। तद् तृणं तेन वृषभेण शीघ्रमेव भक्षितम्। तद् **दग्धम्**। वह्निना सर्वं गृहं दग्धम्। यस्य गृहमग्निना दग्धं सः अत्र आगतः। तद् **हृतम्**। मम धनं तेन हृतम्।

सः **स्थितः**। सः तत्र तूष्णीमेव स्थितः किमपि न वदति। सः **उपविष्टः**। नृपः रथे उपविष्टः। सः **ताडितः**। ह्यः तेन द्वारपालेन चौरः अतीव ताडितः। सः **पीडितः**। सः ज्वरेण पीडितः।

तद् **स्मृतम्**। किं त्वया न स्मृतं यद् तेन उक्तम्? यद् तेन उक्तं तद् सर्वं मया पूर्वमेव **विस्मृतम्**। त्वया तद् कथं विस्मृतम्? तद् **गृहीतम्**। यद् त्वया पुस्तकं गृहीतं तद् मम अस्ति। मार्गे पतितं तद् पुस्तकं तेन गृहीतम्। तद् **पाठितम्**। एकेन गुरुणा एव सर्वं पुस्तकं पाठितम्। तद् **आरब्धम्**। मया शोभनं कर्म आरब्धम्। तद् **त्यक्तम्**। यद् द्रव्यं मया रक्षितं तद् सर्वं त्वया त्यक्तम्। तद् **ज्ञातम्**। ज्ञात्रा ज्ञानं ज्ञातम्। यदि त्वया तद् ज्ञातं तद् मामपि वद। तद् **पीतम्**। त्वया जलं पीतं किम्? तेन वृषभेण जलं पीतम्। तद् **प्रक्षालितम्**। बालकेन वस्त्रं प्रक्षालितम्। तस्य वस्त्रं मया प्रक्षालितम्। तद् **विक्रीतम्**। यदि त्वया अद्यापि वस्त्रं न विक्रीतं तर्हि तद् मह्यं देहि।

## १४ कृदन्त .य .तव्य .अनीय

सः **कर्तव्यः**। सर्वदा उद्यमः **कर्तव्यः**। मित्रेण सह कलहः न कर्तव्यः। तद् **कर्तव्यम्**। ईश्वरस्य पूजनमवश्यं कर्तव्यम्। तद् **गन्तव्यम्**। पाठशालायां सदा नियमेन गन्तव्यम्। यत्र धूमः अस्ति तत्र न गन्तव्यम्। इदानीं तत्र न गन्तव्यमिति त्वं तं कथय। तद् **वक्तव्यम्**। कदापि असत्यं न वक्तव्यं परन्तु सदैव सत्यं वक्तव्यम्। सा **कथनीया**। तेन अद्य शोभना कथा कथनीया।

## १५ कृदन्त .क्त्वा

सः ग्रामात् बहिः **गत्वा** वनं गतः। सः तत्र गत्वा किं किं करोति ? सः वनं गत्वा सन्ध्यां करोति। उद्यानं गत्वा किं करिष्यसि ? तत्र गत्वा स्नानं करिष्यामः। अहं कूपं गत्वा स्नानं कर्तुमिच्छामि। त्वं पूर्वं गृहं गत्वा पश्चात् स्नानं कुरु। सः उद्यानं गत्वा पश्चात् गृहं गमिष्यति। सः ग्रामं गत्वा रात्रौ आगमिष्यति। प्रातः वनं गत्वा सायमागमिष्यामि। सः तत्र गत्वा आगतः किम् ? त्वं कुत्र गत्वा इदानीमत्र आगतः ? गृहं गत्वा अधुना मया अन्नं भक्षितम्। सः पुरुषः नगरं गत्वा जलमानयति। सः आपणं गत्वा कुण्डलिनीमानयति। मालाकारः उद्यानं गत्वा बहूनि पुष्पाणि आनयति। अहं परश्वः नगरं गत्वा गङ्गाजलमानेष्यामि। सः स्वगृहं गत्वा अन्नं भक्षयति। सः वनं गत्वा फलं भक्षयति। किमर्थं त्वं तत्र गत्वा मोदकं भक्षयसि ? सः तत्र गत्वा भूमिं खनति। सः तत्र गत्वा वस्त्रं प्रक्षलयति। अधुना आपणं गत्वा त्वं किं क्रीणासि। सः पाठशालां गत्वा पुस्तकं पठति। सः तत्र गत्वा सन्ध्यामुपास्ते ईश्वरं च स्मरति। उद्यानं गत्वा तत्र स्थातुमिच्छामि। त्वं तं बहुशोभनं ग्रामं गत्वा शीघ्रमत्र आगच्छ। तत्र गत्वा तं पश्य।

सः कर्म **कृत्वा** स्नानं करिष्यति। अहं शौचं कृत्वा मुखप्रक्षालनं करिष्यामि। स्नानं कृत्वा एव हवनं करोमि। स्नानं सन्ध्यां च कृत्वा पुस्तकं पठिष्यामि। सः दिने दिने प्रातः स्नानं कृत्वा वनं गच्छति। स्नानं कृत्वा सन्ध्यां करिष्यसि किम् ? अहं व्यायामं कृत्वा स्नानं कर्तुमिच्छामि। सः बहु कर्म कृत्वा श्रान्तः इति प्रतीयते। भोजनं कृत्वा पठनाय पाठशालां गच्छामि।

सः पुष्पमालां **गृहीत्वा** धावति। त्वं गोदुग्धं गृहीत्वा एव शिवालयं गच्छ। त्वं तस्य पुस्तकं गृहीत्वा शीघ्रमत्र आगच्छ। तां गृहीत्वा दीपं प्रज्वालय शीघ्रं च अत्र आनय। तत्र नवीनं पाठं गृहीत्वा स्वकीयं गृहमागच्छति। सा स्त्री रक्तं वस्त्रं हस्ते गृहीत्वा धावति। इदानीं भोजनस्य समयः जातः शीघ्रं जलं गृहीत्वा अत्र एव आगच्छ।

सः अश्वं **दृष्ट्वा** किं करोति ? तं दृष्ट्वा सः हसति। सूर्यं दृष्ट्वा जनः उत्तिष्ठति। तारकान् दृष्ट्वा मनुष्यः स्वपिति। त्वं तं शोभनं नगरं गत्वा शीघ्रमेव अत्र आगच्छ। सः क्षुधया दुःखितं मनुष्यं दृष्ट्वा तस्मै एव अन्नं ददाति।

तत्र **स्थित्वा** किं करिष्यसि ? अत्र स्थित्वा सः किं कर्तुमिच्छति। सः अत्र स्थित्वा आलेख्यमालिखति। अत्र स्थित्वा सः धर्मप्रचारं करिष्यति। अत्र स्थित्वा कर्म कुरु नोचेद् अत्र न तिष्ठ। वानरः वृक्षे स्थित्वा फलं भक्षयति।

**स्नात्वा** सः सायमागमिष्यति किम् ? अहमिदानीमेव स्नात्वा शीघ्रमागमिष्यामि। शुद्धेन जलेन स्नात्वा सन्ध्योपासनं करोति। सः स्वकीयस्य पाठस्य अध्ययनं कृत्वा स्नानं करोति स्नात्वा च नित्यं कर्म करोति।

सः भोजनं **भक्षयित्वा** पाठशालां गमिष्यति। मोदकं भक्षयित्वा त्वं कुत्र गमिष्यसि ? सः मोदकं भक्षयित्वा पाठशालां पठितुं गतः। पश्चात् लघुमाहारं भक्षयित्वा सत्वरं पाठशालां गच्छति।

दुग्धं **पीत्वा** फलं भक्षयामि। तत्र जलं पीत्वा शीघ्रमत्र आगच्छ। अहं जलं पीत्वा रात्रौ उपरि गमिष्यामि। सः तत्र फलं **स्थापयित्वा** अत्र आगतः। धनं **दत्त्वा** फलं गृहाण। सः द्रव्यं दत्त्वा धान्यं क्रीणाति। पुस्तकं **त्यक्त्वा** गच्छ। रावणः धर्मं त्यक्त्वा राज्यमकरोत्। त्वं **पठित्वा** शीघ्रमागच्छ मसीपात्रं च देहि। सः स्नात्वा पठति पठित्वा भोजनं करोति। सः **स्मृत्वा** वदति। नित्यं परमेश्वरं स्मृत्वा कर्म कुरु।

# १६ कृदन्त यप्

सः प्रातर् **उत्थाय** किं करोति ? सः प्रातरुत्थाय तपः आचरति। प्रातःकाले उत्थाय विद्याभ्यासः कर्तव्यः। प्रातःकाले उत्थाय ईश्वरस्य स्मरणं कर्तव्यम्। ईश्वरस्य स्मरणं प्रभाते उत्थाय अवश्यं कर्तव्यम्। कं **प्रणम्य** सः आगतः ? सः गुरुं प्रणम्य आगतः। सः गुरुं प्रणम्य अध्ययनं करोति। सः तं मुनिं प्रणम्य अत्र आगच्छति। सः प्रातः एव सन्ध्याम् **उपास्य** बहिः गच्छति। सः इदानीं सन्ध्यामुपास्य पठनमारभते।

कः अत्र **उपविश्य** आलेख्यं करोति ? सः तत्र एव उपविश्य सर्वं पश्यति। सः वृद्धः पुरुषः रथे उपविश्य अत्र आगच्छति। सः दुग्धं **विक्रीय** आगच्छति। नवनीतं विक्रीय घृतं च क्रीत्वा आगच्छ। सः प्रातः एव उत्तिष्ठति दीपं **प्रज्वाल्य** पुस्तकं गृहीत्वा स्वीयं पाठं पठति। **विचार्य** एव सर्वं कार्यं कर्तव्यम्।

## 46. Anvaya

The अन्वय (regular word 'order', syntax) in an Active sentence:

| | कर्ता (subject) | कर्म (object) | क्रिया (verb) |
|---|---|---|---|
| | देवः *1.1<br>God | नरम् *2.1<br>man | रक्षति ।<br>protects. |

Other words can be placed wherever they fit the intention best:

| | | | |
|---|---|---|---|
| अर्जुन *8.1 लोके *7.1<br>Arjuna! In the world | देवः हस्तेन *3.1<br>God with [his] hand | नरम् तदनुग्रहाय *4.1<br>man, to favor him, | भयात् *5.1 रक्षति ।<br>from danger protects. |

विशेषण come before their respective विशेष्य.

भक्त *8.1 अर्जुन *8.1 अस्मिन् *7.1 लोके *7.1 दयालुः *1.1 देवः *1.1

Oh Bhakta Arjuna! In this world the merciful God etc.

Since the grammatical value of a word is fixed in the case ending, one can rearrange the words of a Sanskrit sentence in any order and the meaning does not change.

## 47. Pronouns

| | |
|---|---|
| किम् (what?) is the original Interrogative from which others like कुत्र are derived. | The Pronouns यद् and तद् can be used as correlatives in any of their forms. |
| कः *m.1.1 के *m.1.3<br>का *f.1.1 काः *f.1.3 who<br>किम् *n.1.1 कानि *n.1.3 what<br>केन *3.1 with whom /what<br>कस्मात् *5.1 why | यः...सः ये...ते<br>या...सा याः...ताः who...he<br>यद्...तद् यानि...तानि which...that<br>येन...तेन with which... with that<br>यस्मात्...तस्मात् because...therefore |
| कुत्र / क्व where<br>कुतः wherefrom /why<br>कथम् how<br>कदा when<br><br>किम् ind.<br>किमर्थम् ind. why | यत्र...तत्र where...there<br>यतः...ततः wherefrom...therefrom<br>यथा...तथा as...so<br>यदा...तदा when...then<br>यदि...तर्हि if...then<br>यद्...तद्<br>यदर्थम्...तदर्थम् because...therefore |
| कति how many<br>कीयत् how much<br>कीदृक् what kind of | यति...तति how many...so many<br>यावत्...तावत् how much...so much<br>यादृक्...तादृक् as...so |

किम् as question marker:

ग्रामं गच्छसि किम् [?] – are you going to the village?

वा, indicating option and question:

गीता भागवतं वा – गीता or भागवतम्

ग्रामं गच्छसि वा [?] – are you going to the village?

Conditional:

यदि ग्रामं गच्छसि or ग्रामं गच्छसि चेद् – if you go to the village, ...

Distributive:

When the relative pronoun यद् (in any of its forms) is doubled, it acquires a distributive sense. The double relative is used along with a double correlative.

यद् यद् श्रेष्ठः आचरति … तद् तद् जनः – whatever a great man does ...
that very same thing people [also do]

Emphatic:

When the relative pronoun यद् is used in combination with the interrogative किम्, in any of their forms, they denote emphasis and indefiniteness.

येन केन प्रकारेण – by whatever (any) means

In the following cases a word is द्विरुक्ति ('said twice'):

Generalisation

यद् यद् – whatever

गृहे गृहे – in each house

Repetition

संस्मृत्य संस्मृत्य ('पुनः पुनः' संस्मृत्य) – repeatedly remembering

Criticism, Honor (with सम्बोधन)

अर्जुन अर्जुन – oh अर्जुन, अर्जुन!

Abundance

अहो भाग्यम् [अहो] भाग्यम् – what immense fortune!

Excitement

पश्य पश्य – look, look!